योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०३२

द्वात्रिंशः सर्गः ३२

ईश्वर उवाच ।

मुने श्रृणु कथं कार्यकारिणी स्पन्दशालिनी ।

चरन्ती च तनुं पुंसामुपैति परमाभिधाम् ।। १

प्राक्तनैस्तैर्निहन्त्येव स्वमनोमननेहितैः ।

कर्मव्रातैर्विचित्रेहैः परिपीवरतां गतैः ।। २

मनस्तया गता शक्तिः सज्जडेवागता चितेः ।

सा स्फुरत्यनया ब्रह्मन्नुचिता शक्तिभूतया ।। ३

अस्याः प्रसादादिह सा चित्कलङ्कवती मुने ।

जगद्गन्धर्वनगरं करोति न करोति च ।। ४

चित्ताद्यसत्तया देहो मूकस्तिष्ठति कुड्यवत् ।

तत्सत्तया हि स्फुरति नभःसंप्रेरिताश्मवत् ।। ५

यथा स्फुरत्यतिजडमयोऽयस्कान्तसंनिधौ ।

तथा स्फुरति जीवोऽयं सति सर्वगते परे ।। ५

सर्वस्थयात्मशक्त्यैव जीव एष स्फुरत्यलम् ।

मुकुरो बिम्बमादत्ते द्रव्यात्मन्यस्थितादपि ।। ७

प्रविस्मृतस्वभावत्वाज्जीवोऽयं जडतां गतः ।

मोहाद्विस्मृतभावत्वाच्छूद्रतामिव सद्द्विजः ।। ८

प्रविस्मृतस्वभावा हि चिच्चित्तत्वमुपागता ।

मोहापहतचित्तत्वात्सुमहानिव दीनताम् ।। ९

जडयाऽवशया देहो वातशक्तिसमानया ।

संचाल्यते तदनया वारीव वीचिमालया ।। १०

कर्मात्मना वराकेण जीवेन मनसामुना ।

चाल्यन्ते देहयन्त्राणि पाषाणा इव वायुना ।। ११

शरीरशकटानां हि कर्षणे परमात्मना ।

मनःप्राणोदयौ ब्रह्मन्कृतौ कर्मकृतौ दृढौ ।। १२

चिज्जडं तूररीकृत्य रूपं जीवत्वमेत्य च ।

मनोरथमुपारुह्य वहत्प्राणतुरंगमम् ।। १३

क्वचिज्जातपदार्थत्वं क्वचिन्नष्टपदार्थताम् ।

क्वचिद्बहुपदार्थत्वं क्वचिदेकपदार्थताम् ।। १४

गतेव भिन्नेवास्त्येवमत्यजन्ती निजं पदम् ।

जलतेव तरङ्गत्वं सैवासदसदोदिता ।। १५

उपजीव्यात्मनो रूपं परं स्फुरति वृत्तिषु ।

आलोकमुपजीव्येमं रूपश्रीर्दृश्यगा यथा ।। १६

परमात्मनि चित्तत्त्वे स्थिते सति निरामये ।

जीवो जीवति सालोकं दीपे सति गृहं यथा ।। १७

आधयो व्याधयश्चैव प्रयान्त्यस्य प्रपीनताम् ।

अपामिव तरङ्गत्वं वीचित्वस्येव फेनता ।। १८

आधिव्याधिभिराकीर्णशरीराम्भोजषट्पदः ।

जीवो वैषम्यमायाति तरङ्गत्वे यथा पयः ।। १९

चिच्छक्तिः सर्वशक्तित्वान्नाहं चिदिति भावनात् ।

अत्र सैवैति वैवश्यं सूर्यो दीप्तैरिवाम्बुदैः ।। २०

वैवश्याच्चयवती मौढ्यान्न विन्दत्यात्मसंविदम् ।

घनजाड्यपराभूतः स्वाङ्गावदलनं यथा ।। २१

प्राप्य चाप्यनुसंधानमस्या मोहो विनश्यति ।

घनमोहरतो जन्तुः स्वकार्यस्मरणं यथा ।। २२

यदाङ्गसंविदां वातस्पन्दशक्तिः प्रमोषतः ।

न करोत्यनुसंधानं कुष्ठी स्पन्दैषणं यथा ।। २३

असंवित्स्पन्दतो देहे पद्मपत्रं हृदि स्थितम् ।

न स्फुरत्यपरामृष्टं दारुपात्रं यथा बहिः ।। २४

निःस्पन्दे पद्मपत्रेऽन्तः प्राणाः शान्तिं प्रयान्त्यमी ।

तालवृन्ते यथाऽस्पन्दे बहिः पवनशक्तयः ।। २५

प्राणे शान्तेतरस्पर्शे जीवो निष्पूर्णमूकताम् ।

याति शान्ते नभोवायौ न दृश्यत्वं यथा रजः ।। २६

विरजं विगताधारं मनो हि शिष्यते मुने ।

तिष्ठत्यात्मपदं लब्ध्वा जलादितरुबीजवत् ।। २७

इति वैकल्यमायातैः कारणौघैः समन्ततः ।

पुर्यष्टके शमं याते देहः पतति निश्चलः ।। २८

चिच्चेत्यचेतनान्मोहात्स्पन्दमायान्ति वासनाः ।

तदीरिता स्मरत्यन्तरन्यद्विस्मरति स्वयम् ।। २९

हृत्पद्मपत्रस्फुरणात्स्फुटं पुर्यष्टकं भवेत् ।

हृत्पद्मयन्त्रे वहनाद्रुद्धे पुर्यष्टकं क्षयि ।। ३०

देहे पुर्यष्टकं यावदस्ति तावत्स जीवति ।

शान्ते पुर्यष्टके देहो मृत इत्युच्यते द्विज ।। ३१

विरुद्धमलसंबोधाच्छेदभेददशावशात् ।

न प्रस्फुरति हृत्पद्मयन्त्रमभ्यन्तरे यदा ।। ३२

तदा पुर्यष्टकं शान्तिमुपैति गगने शनैः ।

संरोधिते वातयन्त्रे यथा पवनसंततिः ।। ३३

स्वसंवित्तिवशाज्जीवो वैवश्यमुपगच्छति ।

पद्मयन्त्रं शरीरस्थं प्रवाहं याति नित्यदा ।। ३४

वासना विमला येषां हृदयान्नापसर्पति ।

स्थिरैकरूपजीवास्ते जीवन्मुक्ताश्चिरायुषः ।। ३५

संरुद्धे पद्मयन्त्रे हि प्राणे शान्तिमुपागते ।

देहः पतत्यधैर्योऽयं काष्ठलोष्टसमः क्षितौ ।। ३६

यथैव व्योम मरुति लीनं पुर्यष्टकं भवेत् ।

तथैव तत्रैव तदा लयमेति मनो मुने ।। ३७

सुचिराभ्यस्तभावं तु वासनाखचितं मनः ।

यत्र तत्र भ्रमत्स्वर्गनरकादि प्रपश्यति ।। ३८

शरीरं शवतामेति मनोमारुतवर्जितम् ।

गते गृहजने दूरं गृहं संशून्यतामिव ।। ३९

सर्वगा चिच्चेतनतो जीवीभूय मनःस्थिता ।

पुर्यष्टकवपुर्भूत्वा साऽऽतिवाहिकदेहिनी ।। ४०

तन्मात्रपञ्चकं चित्तं क्रोडीकृत्य व्यवस्थिता ।

स्वप्नभ्रमवदाकारं भावात्स्थूलं प्रपश्यति ।। ४१

दृढभावनया पश्चात्तत्रैव रसशालिनी ।

आतिवाहिकदेहत्वं विस्मरत्यखिलं क्षणात् ।। ४२

असत्येव शरीरेऽस्मिन्कृतकृत्रिमभावना ।

नयत्यसत्यं सत्यत्वं सत्यं चासत्यतामपि ।। ४३

सर्वगा हि चिदंशेन जीवीभूयाभवन्मनः ।

मनः पुर्यष्टकरथमाक्रामति ततो जगत् ।। ४४

पुर्यष्टकं वातमयं देहमुत्थापयत्यलम् ।

हृत्स्पन्दिवेताल इव जीवतीत्युच्यते तदा ।। ४५

क्षीणे पुर्यष्टके चित्तं यदा व्योमनि लीयते ।

तदा स्फुरति देहोऽयं मृत इत्युच्यतेऽपि च ।। ४६

स्वभाववशतो जीवो विस्मृत्या शक्तिमृच्छति ।

वैवश्यात्कालवशतः पर्णं जर्जरतामिव ।। ४७

जीवशक्तया परामृष्टे निरुद्धे पद्मयन्त्रके ।

प्राणे संरोधमायाते म्रियते मानवो मुने ।। ४८

यथा जातानि जातानि चान्यान्यन्यानि कालतः ।

वृक्षात्पर्णानि शीर्यन्ते शरीराणि तथा नृणाम् ।। ४९

जायन्ते च म्रियन्ते च शरीराणि शरीरिणाम् ।

पादपानां च पर्णानि का तत्र परिदेवना ।। ५०

चिदम्बुधौ स्फुरन्त्येता देहबुद्बुदपङ्क्तयः ।

इतश्चान्या इतश्चान्या एतास्वास्था न धीमतः ।। ५१

सर्वगापि चिदेतस्मिंश्चेतसि प्रतिबिम्बति ।

पदार्थमन्तरादत्ते नान्यो हि मुकुरादृते ।। ५२

चिदमलनभसि प्रयत्नरूपाः

परिविततते तदतन्मयाः स्फुरन्ति ।

कलकलमुखराः स्फुटाभिरामा

विविधशरीरविमोहतापनाय ।। ५३

इत्यार्षे श्रीवा०रामायणे वाल्मीकीये दे० मोक्षोपायेषु निर्वाणप्रकरणे पू० देहपातविचारो नाम द्वात्रिंशः सर्गः ।। ३२ ।।